भ्रमयत्युचितं विदर्भजा-
ननतीराजनवर्द्धमानकम् ॥”

रुक्मिणी च ॥

विदर्भराजः, पुं, ( विदर्भानां राजा । “राजाहः-सखिभ्यष्टच् ।” इति टच् । ) विदर्भदेशाधिपतिः । तस्य नामान्तरं भीमराजः । यथा,—

“स्मरोपतप्तोऽपि भृशं न स प्रभु-
र्विदर्भराजं तनयामयाचत ।
त्यजन्त्यसून् शर्म्म च मानिनो वरं
त्यजन्ति न त्वेकमयाचितव्रतम् ॥

इति पूर्व्वनैषधे । १ । ५० ॥

विदर्भसुभ्रूः, स्त्री, ( विदर्भस्य सुभ्रू रमणी । ) दमयन्ती । यथा,—

“विदर्भसुभ्रूस्तनतुङ्गताप्तये
घटानिवापश्यदलं तपस्यतः ।
फलानि धूमस्य धयानधोमुखान्
स दाड़िमे दोहदधूपिनि द्रुमे ॥”

इति पूर्व्वनैषधे १ सर्गः ॥

विदर्भाधिपतिः, पुं, ( विदर्भाणामधिपतिः । ) कुण्डिनपतिः । स च भीष्मकराजः रुक्मिणीपिता च । यथा,—

“तं वै विदर्भाधिपतिः समभ्येत्याभिवाद्य च ।
निवेशयामास मुदा कल्पितान्यनिवेशने ॥”

इति श्रीभागवतीयदशमस्कन्धे ५३ अध्यायः ॥

विदलं, क्ली, ( विघट्टितं दलं यस्य । ) द्विधाकृतकलायादि । दालि इति भाषा । स्वर्णादेरवयवः । दाड़िमकल्कः । वंशादिकृतपात्रविशेषः । इति क्लीवलिङ्गसंग्रहे अमरभरतौ ॥

विदलः, पुं, ( विघट्टितानि दलानि यस्य । ) रक्तकाञ्चनः । इति शब्दरत्नावली ॥ पिष्टकः । इति शब्दचन्द्रिका ॥

विदला, स्त्री, ( विघट्टितानि दलानि यस्याः । ) त्रिवृत् । इति राजनिर्घण्टः ॥ पत्रशून्या । यथा,

“विशीर्णा विदला ह्रस्वा वक्रा स्थूला द्विधाकृता ।
कृमिदष्टा च दीर्घा च समिधो नैव कारयेत् ॥”

इति तन्त्रम् ॥

विदा, स्त्री, ( विद ज्ञाने + “षिद्भिदादिभ्योऽङ् ।” ३ । ३ । १०४ । इत्यङ् । टाप् । ) ज्ञानम् । बुद्धिः । इति मेदिनी । दे, १४ ॥

विदायः, पुं, ( विगतो दायः साक्षात्करणादिरूपस्थलं येन । ) गमनानुमतिः । यथा,—

“क्षणं वा चम्पकवनं गच्छ वा तिष्ठ सुन्दरि ! ।
क्षणं गृहञ्च यास्यामि विशिष्टं कार्य्यमस्ति मे ।
विदायं देहि संप्रीत्या क्षणं मे प्राणवल्लभे ॥”

इति ब्रह्मवैवर्त्ते जन्मखण्डे श्रीराधां प्रति श्रीकृष्णवाक्यम् ॥

विदारः, पुं, ( वि + दॄ + घञ् । ) जलोच्छ्वासः । विदारणम् । इति मेदिनी । रे, ११६ ॥ युद्धम् । इति हेमचन्द्रः ॥

विदारकं, क्ली, (विदृणातीति । वि + दॄ + ण्वुल् ।) पञ्चक्षारम् । इति राजनिर्घण्टः ॥

विदारकः, पुं, (विदृणाति जलयानादीनिति । वि + दॄ + ण्वुल् । ) जलमध्यस्थिततरुशिलादिः । तत्पर्य्यायः । कूपकः २ । इत्यमरः ॥ जलबन्धकः । इति शब्दरत्नावली ॥ शुष्कनद्यादौ जलावस्थानार्थं गर्त्तः । इति सर्व्वधरः ॥ अतएव कूपा इव कूपकाः । कुत्सिताश्च कूपा इति वा । विदारयन्तीति विदारकाः । जलान्तर्गतास्तरुशिलादयोऽज्ञानान्नौकादिविदारकाः कूपकाः । इति स्वाम्ञः । बहुत्वमतन्त्रम् । इति भरतः ॥

विदारणं, क्ली, ( वि + दॄ + णिच् + भावे ल्युट् ।) विडम्बः । भेदः । इति मेदिनी । णे, १०७ ॥ ( यथा, हरिवंशे । ६५ । ७६ ।

“आयुधावाप्तिरन्नैव वपुषो वैष्णवस्य च ।
लक्ष्म्याश्च तेजसश्चैव व्यूहानाञ्च विदारणम् ॥”)

मारणम् । इति शब्दरत्नावली ॥

विदारणः, पुं स्त्री, ( विदार्य्यन्ते शत्रवोऽस्मिन्निति । वि + दॄ + णिच् + ल्युट् । ) युद्धम् । इति मेदिनी । णे, १०७ ॥ (विदारयतीति । वि + दॄ + णिच् + ल्युः । विदारके, त्रि । यथा, मार्कण्डेये । २० । २ ।

“तस्यात्मजो महावीर्य्यो बभूवारिविदारणः ॥”)

विदारणः, पुं, ( विदार्य्यतेऽसौ इति । वि + दॄ + णिच् + कर्म्मणि ल्युट् ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥

विदारिका, स्त्री, (वि + दॄ + णिच् + ण्वुल् । टापि अत इत्वम् ।) शालपर्णी । इति शब्दरत्नावली ॥ ( यथा, वृहत्संहितायाम् । ७६ । ५ ।

“विदारिकाया स्वरसेन चूर्णं
सुहुर्मुहुर्भावितशोषितञ्च ।
शृतेन दुग्धेन सशर्करेण
पिबेत् स यस्य प्रमदाः प्रभूताः ॥” )

विदारिणी, स्त्री, (विदृणातीति । वि + दॄ + णिनिः । ङीप् । ) काश्मरी । इति राजनिर्घण्टः ॥ ( विदारणकर्त्री । यथा, कथासरित्सागरे । ५३ । १७१ ।

“एकानंशे शिवे दुर्गे नारायणि सरस्वति ।
भद्रकालि महालक्ष्मि सिद्धे रुरुविदारिणि ॥” )

विदारी, स्त्री, (विदारयतीति । वि + दॄ + णिच् + अच् । गौरादित्वात् ङीष् । ) शालपर्णी । इति मेदिनी ॥ भूमिकुष्माण्डः । तत्पर्य्यायः । क्षीरशुक्ला २ इक्षुगन्धा ३ क्रोष्ट्री ४ । इत्यमरः ॥ विदारिका ५ स्वादुकन्दा ६ सिता ७ शुक्ला ८ शृगालिका ९ वृष्यकन्दा १० बिड़ाली ११ वृष्यवल्लिका १२ भूकुष्माण्डी १३ स्वादुलता १४ गजेष्टा १५ वारिवल्लभा १६ गन्धफला १७ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । गुरुत्वम् । स्निग्धत्वम् । अस्रपित्तनाशित्वम् । कफकारित्वम् । पुष्टिबलवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ विदारी वातपित्तघ्नी वृष्या बल्या रसायनी इति राजवल्लभः ॥ * ॥ अष्टादश-प्रकारकण्ठरोगान्तर्गत-रोगविशेषः । यथा, अथ विदारीमाह ।

“सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्वदने विदारीं
पार्श्वे विशेषात् स तु येन शेते ॥”

स पुरुषो येन पार्श्वेन विशेषाद्बाहुल्येन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थः । इति भावप्रकाशः ॥ अस्याश्चिकित्सादि रोहिणीशब्दे द्रष्टव्यम् ॥

विदारी, [न्] त्रि, विदारणकर्त्ता । विपूर्व्वदॄधातोः कर्त्तरि णिनिप्रत्ययेन निष्पन्नः ॥

विदारीगन्धा, स्त्री, ( विदार्य्या भूमिकुष्माण्डस्येव गन्धो यस्याः । ) शालपर्णी । इत्यमरः ॥

विदारुः, पुं, कृकचपादः । कृकलासः । इति हारावली । २१८ ॥

विदाहि, [न्] क्ली, ( विदहतीति । वि + दह + णिनिः । ) दाहजनकद्रव्यम् । अस्य गुणौ । पित्तकृत्वुकारित्वे । इति राजवल्लभः ॥ ( दाहजनकमात्रे, त्रि । यथा, गीतायाम् । १७ । ९ ।

“कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥”)

विदिक्, [श्] स्त्री, ( दिग्भ्यां विगता । ) दिशोर्मध्यम् । अग्निनिर्ऋतिवाय्वीशानकोणचतुष्टयम् । तत्पर्य्यायः । अपदिशम् २ । इत्यमरः ॥ प्रदिक् ३ । इति जटाधरः ॥ विदिशम् ४ । इति शब्दरत्नावली ॥ कोणः ५ । इति राजनिर्घण्टः ॥ ( यथा, भागवते । ४ । १७ । १६ ।

“सा दिशो विदिशो देवी रोदसी चान्तरं तयोः ।
धावन्ती तत्र तत्रैनं ददर्शानुद्यतायुधम् ॥” )

विदिक्चक्रः, पुं, हरिद्राङ्गपक्षी । इति शब्दचन्द्रिका ॥

विदितं, त्रि, ( विद + क्तः । ) अवगतम् । इत्यमरः ॥ ( यथा, महाभारते । १ । २८ । २२ ।

“सवाणः सधनुश्चाहं ससुरासुरमानुषान् ।
शक्तो लोकानिमान् जेतुं तथापि विदितं
तव ॥”)

अर्थितम् । इति मेदिनी । ते, १०६ ॥ उपगमः । इति शब्दरत्नावली ॥

विदितः, पुं, ( विदितं ज्ञानमस्यास्तीति । अर्श-आदित्वात् अच् । ) कविः । इति जटाधरः ॥ ( ज्ञानाश्रये, त्रि । यथा, किराते । १ । १ ।

“श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
सवर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥”

विदिथः, पुं, पण्डितः । योगी । इति शब्दरत्नावली हस्ताक्षरमेदिनी च ॥ मुद्राङ्कितमेदिन्यां हेमचन्द्रे च विदथ इति पाठः ॥

विदीर्णः, त्रि, ( वि + दॄ + क्तः । ) कृतविदारणः । चेरा इति भाषा । यथा,—

पितर ऊचुः ।

“श्राद्धानि नोऽधिभुजे प्रसभं तनूजै-
र्दत्तानि तीर्थसमयेऽप्यपिबत्तिलाम्बु ।